## || श्रथ तृतीयः पादः ||

—श्रथ द्वितीयं प्रागीषात् ।

—त्र्यचां प्राङ् मकरात् ।

—स्वाङ्गानामकुर्वादीनाम् ।

—मादीनां च ।

—शादीनां शाकानाम् ।

—पान्तानां गुर्वादीनाम् ।

—युतान्यण्यन्तानाम् ।

—मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाक लोमाकाष्ठापेष्ठाकाशी नामादिर्वा ।

—छन्दसि च ।

—कर्दमादीनां च ।

—सुगन्धितेजनस्य ते वा ।

—नपः फलान्तानाम् ।

—यान्तस्यान्त्यात्पूर्वम् ।

—थान्तस्य च नालघुनी ।

—शिशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूरवसां च ।

—सांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानाम् ।

—ईषान्तस्य हयादेरादिर्वा ।

—उशीरदाशेरकपालपलालशैवालश्यामाकशारीर शरावहृदयहिरण्यारण्यापत्यदेवराणाम् ।

—महिष्यषाढयोर्जायेष्टकाख्या चेत् ।

|| इति फिट्सूत्रेषु तृतीयः पादः ||

## || श्रथ चतुर्थः पादः ||

१—शकटिशकट्योरक्षरमक्षरं पर्यायेण ।

२—गोष्ठजस्य ब्राह्मणनामधेयस्य ।

३—पारावतस्योपोत्तमवर्जम् ।

४—धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधूजलस्थाना

५—कपिकेशहरिकेशयोश्छन्दसि ।

६—न्यङ्स्वरौ स्वरितौ ।

७—न्यर्बुदव्यल्कशयोरादिः ।

८—तिल्यशिक्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः ।

९—बिल्वभक्ष्यवीर्याणिच्छन्दसि ।

०—त्वत्त्वसमसिमेत्यनुच्चानि ।

१—सिमस्याथर्वणेऽन्त उदात्तः ।

२—निपाता आद्युदात्ताः ।

३—उपसर्गाश्चाभिवर्जम् ।

४—एवादीनामन्तः ।

५—वाचादीनामुभावुदात्तौ ।

६—चादयोऽनुदात्ताः ।

७—यथेति पादान्ते ।

८—प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः ।

९—शेषं सर्वमनुदात्तम् ।

|| इति फिट्सूत्रेषु चतुर्थः पादः ||

|| इति आचार्यशान्तनुप्रणीतः फिट्सूत्रपाठः ||

Created by demo-version of Universal Document Converter. Full version doesn't ad
WWW.PRINT-DRIVER.COM